# pai NgalopaniShath

# પૈઙ્ગલોપનિષત્

## Document Information

Text title : Paingal Upanishad

File name : paingala.itx

Category : upanishhat, upanishad

Location : doc_upanishhat

Author : Vedic Tradition

Transliterated by : Sunder Hattangadi (sunderh at hotmail.com)

Proofread by : Sunder Hattangadi (sunderh at hotmail.com)

Description-comments : 59/108; Shukla Yajur Veda, Samanya Upanishad

Latest update : July 16, 1999

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 31, 2020

*sanskritdocuments.org*

# પૈઙ્ગલોપનિષત્

શુક્લયજુર્વેદીય સામાન્ય ઉપનિષત્ ॥

પૈઙ્ગલોપનિષદ્વેદ્યં પરમાનન્દવિગ્રહમ્ ।
પરિતઃ કલયે રામં પરમાક્ષરવૈભવમ્ ॥

ૐ પૂર્ણમદઃ પૂર્ણમિદં પૂર્ણાત્પૂર્ણમુદચ્યતે ।
પૂર્ણસ્ય પૂર્ણમાદાય પૂર્ણમેવાવશિષ્યતે ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

અથ હ પૈઙ્ગ઼લો યાજ્ઞવલ્ક્યમુપસમેત્ય
દ્વાદશવર્શશુશ્રૂષાપૂર્વકં
પરમરહસ્યકૈવલ્યમનુબ્રૂહીતિ પપ્રચ્છ । સ હોવાચ
યાજ્ઞવલ્ક્યઃ સદેવ સોમ્યેદમગ્ર આસીત્ ।
તન્નિત્યમુક્તમવિક્રિયં સત્યજ્ઞાનાનન્દં પરિપૂર્ણં
સનાતનમેકમેવાદ્વિતીયં બ્રહ્મ ।
તસ્મિન્મરુશુક્તિકાસ્થાણુસ્ફટિકાદૌ
જલરૌપ્યપુરુષરેખાદિવલ્લોહિતશુક્લકૃષ્ણગુણમયી
ગુણસામ્યાનિર્વાચ્યા મૂલપ્રકૃતિરાસીત્ । તત્પ્રતિબિમ્બિતં
યત્તત્સાક્ષિચૈતન્યમાસીત્ । સા પુનર્વિકૃતિં પ્રાપ્ય
સત્ત્વોદ્રિક્તાઽવ્યક્તાખ્યાવરણશક્તિરાસીત્ । તત્પ્રતિબિમ્બિતં
યત્તદીશ્વરચૈતન્યમાસીત્ । સ સ્વાધીનમાયઃ સર્વજ્ઞઃ
સૃષ્ટિસ્થિતિલયાનામાદિકર્તા જગદઙ્કુરરૂપો ભવતિ ।
સ્વસ્મિન્વિલીનં સકલં જગદાવિર્ભાવયતિ ।
પ્રાણિકર્મવશાદેષ પટો યદ્વત્પ્રસારિતઃ
પ્રાણિકર્મક્ષયાત્પુનસ્તિરોભાવયતિ । તસ્મિન્નેવાખિલં વિશ્વં
સઙ્કોચિતપટવદ્વર્તતે । ઈશાધિષ્ઠિતાવરણશક્તિતો
રજોદ્રિક્તા મહદાખ્યા વિક્ષેપશક્તિરાસીત્ । તત્પ્રતિબિમ્બિતં

યત્તદ્ધિરણ્યગર્ભચૈતન્યમાસીત્ । સ મહત્તત્ત્વાભિમાની
સ્પષ્ટાસ્પષ્ટવપુર્ભવતિ ।
હિરણ્યગર્ભાધિષ્ઠિતવિક્ષેપશક્તિતસ્તમોદ્રિક્તાહઙ્કારાભિધા
સ્થૂલશક્તિરાસીત્ । તત્પ્રતિબિમ્બિતં
યત્તદ્વિરાટચૈતન્યમાસીત્ । સ તદભિમાની સ્પષ્ટવપુઃ
સર્વસ્થૂલપાલકો વિષ્ણુઃ પ્રધાનપુરુષો ભવતિ ।
તસ્માદાત્મન આકાશઃ સમ્ભૂતઃ । આકાશાદ્વાયુઃ । વાયોરગ્નિઃ
। અગ્નેરાપઃ । અદ્ભ્યઃ પૃથિવી । તાનિ પઞ્ચ તન્માત્રાણિ
ત્રિગુણાનિ ભવન્તિ । સ્રષ્ટુકામો જગદ્યોનિસ્તમોગુણમધિષ્ઠાય
સૂક્ષ્મતન્માત્રાણિ ભૂતાનિ સ્થૂલીકર્તું સોઽકામયત ।
સૃષ્ટેઃ પરિમિતાનિ ભૂતાન્યેકમેકં દ્વિધા વિધાય
પુનશ્ચતુર્ધા કૃત્વા સ્વસ્વેતરદ્વિતીયાંશૈઃ પઞ્ચધા
સંયોજ્ય પઞ્ચીકૃતભૂતૈરનન્તકોટિબ્રહ્માણ્ડાનિ
તત્તદણ્ડોચિતગોલકસ્થૂલશરીરાણ્યસૃજત્ । સ
પઞ્ચભૂતાનાં રજોંશાંશ્ચતુર્ધા કૃત્વા
ભાગત્રયાત્પઞ્ચવૃત્ત્યાત્મકં પ્રાણમસૃજત્ । સ તેષાં
તુર્યભાગેન કર્મેન્દ્રિયાણ્યસૃજત્ । સ તેષાં સત્ત્વાંશં
ચતુર્ધા કૃત્વા ભાગત્રયસમષ્ટિતઃ
પઞ્ચક્રિયાવૃત્ત્યાત્મકમન્તઃકરણમસૃજત્ । સ તેષાં
સત્ત્વતુરીયભાગેન જ્ઞાનેન્દ્રિયાણ્યસૃજત્ । સત્ત્વસમષ્ટિત
ઇન્દ્રિયપાલકાનસૃજત્ । તાનિ સૃષ્ટાન્યણ્ડે પ્રાચિક્ષિપત્
। તદાજ્ઞયા સમષ્ટ્યણ્ડં વ્યાપ્ય તાન્યતિષ્ઠન્ ।
તદાજ્ઞયાહઙ્કારસમન્વિતો વિરાટ્ સ્થૂલાન્યરક્ષત્ ।
હિરણ્યગર્ભસ્તદાજ્ઞયા સૂક્ષ્માણ્યપાલયત્ । અણ્ડસ્થાનિ તાનિ
તેન વિના સ્પન્દિતું ચેષ્ટિતું વા ન શેકુઃ । તાનિ
ચેતનીકર્તું સોઽકામયત બ્રહ્માણ્ડબ્રહ્મરન્ધ્રાણિ
સમસ્તવ્યષ્ટિમસ્તકાન્વિદાર્ય તદેવાનુપ્રાવિશત્ । તદા
જડાન્યપિ તાનિ ચેતનવત્સ્વકર્માણિ ચક્રિરે । સર્વજ્ઞેશો
માયાલેશસમન્વિતો વ્યષ્ટિદેહં પ્રવિશ્ય તયા મોહિતો
જીવત્વમગમત્ ।
શરીરત્રયતાદાત્મ્યાત્કર્તૃત્વભોક્તૃત્વતામગમત્ ।
જાગ્રત્સ્વપ્નસુષુપ્તિમૂર્ચ્છામરણધર્મયુક્તો

ઘટીયન્ત્રવદુદ્વિગ્નો જાતો મૃત ઇવ કુલાલચક્રન્યાયેન
પરિભ્રમતીતિ ॥ ઇતિ પ્રથમોઽધ્યાયઃ ॥ ૧॥

અથ પૈઙ્ગલો યાજ્ઞવલ્ક્યમુવાચ સર્વલોકાનાં
સૃષ્ટિસ્થિત્યન્તકૃદ્વિભૂરીશઃ કથં જીવત્વમગમદિતિ । સ
હોવાચ યાજ્ઞવલ્ક્યઃ સ્થૂલસૂક્ષ્મકારણદેહોદ્ભવપૂર્વકં
જીવેશ્વરસ્વરૂપં વિવિચ્ય કથયામીતિ
સાવધાનેનૈકાગ્રતયા શ્રૂયતામ્ । ઈશઃ
પઞ્ચીકૃતમહાભૂતલેશાનાદાય
વ્યષ્ટિસમષ્ટ્યાત્મકસ્થૂલશરીરાણિ યથાક્રમમકરોત્ ।
કપાલચર્માન્ત્રાસ્થિમાંસનખાનિ પૃથિવ્યંશાઃ ।
રક્તમૂત્રલાલાસ્વેદાદિકમવંશાઃ ।
ક્ષુત્તૃષ્ણોષ્ણમોહમૈથુનાદ્યા અગ્ન્યંશાઃ ।
પ્રચારણોત્તારણશ્વાસાદિકા વાય્વંશાઃ । કામક્રોધાદયો
વ્યોમાંશાઃ । એતત્સઙ્ઘાતં કર્મણિ સઞ્ચિતં ત્વગાદિયુક્તં
બાલ્યાદ્યવસ્થાભિમાનાસ્પદં બહુદોપાશ્રયં સ્થૂલશરીરં
ભવતિ ॥

અથાપઞ્ચીકૃતમહાભૂતરજોંશભાગત્રયસમષ્ટિતઃ
પ્રાણમસૃજત્ । પ્રાણાપાનવ્યાનોદાનસમાનાઃ પ્રાણવૃત્તયઃ
। નાગકૂર્મકૃકરદેવદત્તધનઞ્જયા ઉપપ્રાણાઃ ।
હૃદાસનનાભિકણ્ઠસર્વાઙ્ગાનિ સ્થાનાનિ ।
આકાશાદિરજોગુણતુરીયભાગેન કર્મેન્દ્રિયમસૃજત્ ।
વાક્પાણિપાદપાયૂપાસ્થાસ્તદ્વૃત્તયઃ ।
વચનાદાનગમનવિસર્ગાનન્દાસ્તદ્વિષયાઃ ॥

એવં ભૂતસત્ત્વાંશભાગત્રયસમષ્ટિતોઽન્તઃકરણમસૃજત્
। અન્તઃકરણમનોબુદ્ધિચિત્તાહઙ્કારાસ્તદ્વૃત્તયઃ ।
સઙ્કલ્પનિશ્ચયસ્મરણાભિમાનાનુસન્ધાનાસ્તદ્વિષયાઃ ।
ગલવદનનાભિહૃદયભ્રૂમધ્યં સ્થાનમ્ ।
ભૂતસત્વતુરીયભાગેન જ્ઞાનેન્દ્રિયમસૃજત્ ।
શ્રોત્રત્વક્ચક્ષુર્જિહ્વાઘ્રાણાસ્તદ્વૃત્તયઃ ।
શબ્દસ્પર્શરૂપરસગન્ધાસ્તદ્વિષયાઃ ।
દિગ્વાતાર્કપ્રચેતોઽશ્વિવહ્નીન્દ્રોપેન્દ્રમૃત્યુકાઃ । ચન્દ્રો

વિષ્ણુશ્ચતુર્વક્ત્રઃ શમ્ભુશ્ચ કારણાધિપાઃ ॥

અથાન્નમયપ્રાણમયમનોમયવિજ્ઞામયાનન્દમયાઃ પઞ્ચ
કોશાઃ । અન્નરસેનૈવ ભૂત્વાન્નરસેનાભિવૃદ્ધિં
પ્રાપ્યાન્નરસમયપૃથિવ્યાં યદ્વિલીયતે સોઽન્નમયકોશઃ ।
તદેવ સ્થૂલશરીરમ્ । કર્મેન્દ્રિયૈઃ સહ પ્રાણાદિપઞ્ચકં
પ્રાણમયકોશઃ । જ્ઞાનેન્દ્રિયૈઃ સહ બુદ્ધિર્વિજ્ઞાનમયકોશઃ ।
એતત્કોશત્રયં લિઙ્ગશરીરમ્ ।
સ્વરૂપાજ્ઞાનમાનન્દમયકોશઃ । તત્કારણશરીરમ્ ॥

અથ જ્ઞાનેન્દ્રિયપઞ્ચકં કર્મેન્દ્રિયપઞ્ચકં
પ્રાણાદિપઞ્ચકં વિયદાદિપઞ્ચકમન્તઃકરણચતુષ્ટયં
કામકર્મતમાંસ્યષ્ટપુરમ્ ॥

ઈશાજ્ઞયા વિરાજો વ્યષ્ટિદેહં પ્રવિશ્ય બુદ્ધિમધિષ્ઠાય
વિશ્વત્વમગમત્ । વિજ્ઞાનાત્મા ચિદાભાસો વિશ્વો વ્યાવહારિકો
જાગ્રત્સ્થૂલદેહાભિમાની કર્મભૂરિતિ ચ વિશ્વસ્ય નામ
ભવતિ । ઈશાજ્ઞયા સૂત્રાત્મા વ્યષ્ટિસૂક્ષ્મશરીરં
પ્રવિશ્ય મન અધિષ્ઠાય તૈજસત્વમગમત્ । તૈજસઃ
પ્રાતિભાસિકઃ સ્વપ્નકલ્પિત ઇતિ તૈજસસ્ય નામ ભવતિ ।
ઈશાજ્ઞયા માયોપાધિરવ્યક્તસમન્વિતો વ્યષ્ટિકારણશરીરં
પ્રવિશ્ય પ્રાજ્ઞત્વમગમત્ । પ્રાજ્ઞોવિચ્છિન્નઃ પારમાર્થિકઃ
સુષુપ્ત્યભિમાનીતિ પ્રાજ્ઞસ્ય નામ ભવતિ ।
અવ્યક્તલેશાજ્ઞાનાચ્છાદિતપારમાર્થિકજીવસ્ય
તત્ત્વમસ્યાદિવાક્યાનિ બ્રહ્મણૈકતાં જગુઃ
નેતરયોર્વ્યાવહારિકપ્રાતિભાસિકયોઃ ।
અન્તઃકરણપ્રતિબિમ્બિતચૈતન્યં યત્તદેવાવસ્થાત્રયભાગ્ભવતિ
। સ જાગ્રત્સ્વપ્નસુષુપ્ત્યવસ્થાઃ પ્રાપ્ય ઘટીયન્ત્રવદુદ્વિગ્નો
જાતો મૃત ઇવ સ્થિતો ભવતિ । અથ
જાગ્રત્સ્વપ્નસુષુપ્તિમૂર્ચ્છામરણાદ્યવસ્થાઃ પઞ્ચ ભવન્તિ
॥

તત્તદ્દેવતાગ્રહાન્વિતૈઃ શ્રોત્રાદિજ્ઞાનેન્દ્રિયૈઃ
શબ્દાદ્યર્થવિષયગ્રહણજ્ઞાનં જાગ્રદવસ્થા ભવતિ ।

તત્ર ભ્રૂમધ્યં ગતો જીવ આપાદમસ્તકં વ્યાપ્ય
કૃષિશ્રવણાદ્યખિલક્રિયાકર્તા ભવતિ । તત્તત્ફલભુક્ ચ
ભવતિ । લોકાન્તરગતઃ કર્માર્જિતફલં સ એવ ભુઙ્ક્તે । સ
સાર્વભૌમવદ્વ્યવહારાચ્છ્રાન્ત અન્તર્ભવનં પ્રવેષ્ટું
માર્ગમાશ્રિત્ય તિષ્ઠતિ । કરણોપરમે
જાગ્રત્સંસ્કારોત્થપ્રબોધવદ્ગ્રાહ્યગ્રાહકરૂપસ્ફુરણં
સ્વપ્નાવસ્થા ભવતિ । તત્ર વિશ્વ એવ
જાગ્રદ્વ્યવહારલોપાન્નાડીમધ્યં ચરંસ્તૈજસત્વમવાપ્ય
વાસનારૂપકં જગદ્વૈચિત્ર્યં સ્વભાસા ભાસયન્યથેપ્સિતં
સ્વયં ભુઙ્ક્તે ॥

ચિત્તૈકકરણા સુષુપ્ત્યવસ્થા ભવતિ ।
ભ્રમવિશ્રાન્તશકુનિઃ પક્ષૌ સંહૃત્ય નીડાભિમુખં યથા
ગચ્છતિ તથા જીવોઽપિ જાગ્રત્સ્વપ્નપ્રપઞ્ચે વ્યવહૃત્ય
શ્રાન્તોઽજ્ઞાનં પ્રવિશ્ય સ્વાનન્દં ભુઙ્ક્તે ॥

અકસ્માન્મુદ્ગરદણ્ડાદ્યૈસ્તાડિતવદ્ભયાજ્ઞાનાભ્યામિન્દ્રિયસઙ્ઘ્
આતૈઃ કમ્પન્નિવ મૃતતુલ્યા મૂર્ચ્છા ભવતિ ।
જાગ્રત્સ્વપ્નસુષુપ્તિમૂર્ચ્છાવસ્થાનામન્યા
બ્રહ્માદિસ્તમ્બપર્યન્તં સર્વજીવભયપ્રદા સ્થૂલદેહવિસર્જની
મરણાવસ્થા ભવતિ । કર્મેન્દ્રિયાણિ જ્ઞાનેન્દ્રિયાણિ
તત્તદ્વિષયાન્પ્રાણાન્સંહૃત્ય કામકર્માન્વિત
અવિદ્યાભૂતવેષ્ટિતો જીવો દેહાન્તરં પ્રાપ્ય લોકાન્તરં
ગચ્છતિ । પ્રાક્કર્મફલપાકેનાવર્તાન્તરકીટવદ્વિશ્રાન્તિં
નૈવ ગચ્છતિ । સત્કર્મપરિપાકતો બહૂનાં જન્મનામન્તે
નૃણાં મોક્ષેચ્છા જાયતે । તદા સદ્ગુરુમાશ્રિત્ય
ચિરકાલસેવયા બન્ધં મોક્ષં કશ્ચિત્પ્રયાતિ । અવિચારકૃતો
બન્ધો વિચારાન્મોક્ષો ભવતિ । તસ્માત્સદા વિચારયેત્ ।
અધ્યારોપાપવાદતઃ સ્વરૂપં નિશ્ચયીકર્તું શક્યતે ।
તસ્માત્સદા વિચારયેજ્જગજ્જીવપરમાત્મનો
જીવભાવજગદ્ભાવબાધે પ્રત્યગભિન્નં બ્રહ્મૈવાવશિષ્યત
ઇતિ ॥ ઇતિ દ્વિતીયોઽધ્યાયઃ ॥ ૨॥

અથ હૈનં પૈઙ્ગલઃ પ્રપચ્છ યાજ્ઞવલ્ક્યં

મહાવાક્યવિવરણમનુબ્રૂહીતિ । સ હોવાચ
યાજ્ઞવલ્ક્યસ્તત્ત્વમસિ ત્વં તદસિ ત્વં બ્રહ્માસ્યહં
બ્રહ્માસ્મીત્યનુસન્ધાનં કુર્યાત્ । તત્ર પારોક્ષ્યશબલઃ
સર્વજ્ઞત્વાદિલક્ષણો માયોપાધિઃ સચ્ચિદાનન્દલક્ષણો
જગદ્યોનિસ્તત્પદવાચ્યો ભવતિ । સ
એવાન્તઃકરણસમ્ભિન્નબોધોઽસ્મત્પ્રત્યયાવલમ્બનસ્ત્વમ્પદવાચ્યો
ભવતિ । પરજીવોપાધિમાયાવિદ્યે વિહાય તત્ત્વંપદલક્ષ્યં
પ્રત્યગભિન્નં બ્રહ્મ । તત્ત્વમસીત્યહં બ્રહ્માસ્મીતિ
વાક્યાર્થવિચારઃ શ્રવણં ભવતિ । એકાન્તેન
શ્રવણાર્થાનુસન્ધાનં મનનં ભવતિ ।
શ્રવણમનનનિર્વિચિકિત્સેઽર્થે વસ્તુન્યેકતાનવત્તયા
ચેતઃસ્થાપનં નિદિધ્યાસનં ભવતિ । ધ્યાતૃધ્યાને વિહાય
નિવાતસ્થિતદીપવદ્ધ્યેયૈકગોચરં ચિત્તં સમાધિર્ભવતિ ।
તદાનીમાત્મગોચરા વૃત્તયઃ સમુત્થિતા અજ્ઞાતા ભવન્તિ ।
તાઃ સ્મરણાદનુમીયન્તે । ઇહાનાદિસંસારે સઞ્ચિતાઃ
કર્મકોટયોઽનેનૈવ વિલયં યાન્તિ ।
તતોભ્યાસપાટવાત્સહસ્રશઃ સદામૃતધારા વર્ષતિ । તતો
યોગવિત્તમાઃ સમાધિં ધર્મમેઘં પ્રાહુઃ । વાસનાજાલે
નિઃશેષમમુના પ્રવિલાપિતે કર્મસઞ્ચયે પુણ્યપાપે
સમૂલોન્મૂલિતે પ્રાક્પરોક્ષમપિ
કરતલામલકવદ્વાક્યમપ્રતિબદ્ધાપરોક્ષસાક્ષાત્કારં
પ્રસૂયતે । તદા જીવન્મુક્તો ભવતિ ॥

ઈશઃ પઞ્ચીકૃતભૂતાનામપઞ્ચીકરણં કર્તું
સોઽકામયત । બ્રહ્માણ્ડતદ્ગતલોકાન્કાર્યરૂપાંશ્ચ
કારણત્વં પ્રાપયિત્વા તતઃ સૂક્ષ્માઙ્ગં કર્મેન્દ્રિયાણિ
પ્રાણાંશ્ચ જ્ઞાનેન્દ્રિયાણ્યન્તઃકરણચતુષ્ટયં
ચૈકીકૃત્ય સર્વાણિ ભૌતિકાનિ કારણે ભૂતપઞ્ચકે સંયોજ્ય
ભૂમિં જલે જલં વહ્નૌ વહ્નિં વાયૌ વાયુમાકાશે
ચાકાશમહઙ્કારે ચાહઙ્કારં મહતિ મહદવ્યક્તેઽવ્યક્તં
પુરુષે ક્રમેણ વિલીયતે । વિરાડ્ઢિરણ્યગર્ભેશ્વરા
ઉપાધિવિલયાત્પરમાત્મનિ લીયન્તે ।

પઞ્ચીકૃતમહાભૂતસમ્ભવકર્મસઞ્ચિતસ્થૂલદેહઃ
કર્મક્ષયાત્સત્કર્મપરિપાકતોઽપઞ્ચીકરણં પ્રાપ્ય
સૂક્ષ્મેણૈકીભૂત્વા કારણરૂપત્વમાસાદ્ય તત્કારણં
કૂટસ્થે પ્રત્યગાત્મનિ વિલીયતે । વિશ્વતૈજસપ્રાજ્ઞાઃ
સ્વસ્વોપાધિલયાત્પ્રત્યગાત્મનિ લીયન્તે । અણ્ડં જ્ઞાનાગ્નિના
દગ્ધં કારણૈઃ સહ પરમાત્મનિ લીનં ભવતિ । તતો બ્રાહ્મણઃ
સમાહિતો ભૂત્વા તત્ત્વંપદૈક્યમેવ સદા કુર્યાત્ । તતો
મેઘાપાયેઽંશુમાનિવાત્માવિર્ભવતિ । ધ્યાત્વા
મધ્યસ્થમાત્માનં કલશાન્તરદીપવત્ ।
અઙ્ગુષ્ઠમાત્રમાત્માનમધૂમજ્યોતિરૂપકમ્ ॥ ૧॥

પ્રકાશયન્તમન્તઃસ્થં ધ્યાયેત્કૂટસ્થમવ્યયમ્ ।
ધ્યાયન્નાસ્તે મુનિશ્ચૈવ ચાસુપ્તેરામૃતેસ્તુ યઃ ॥ ૨॥

જીવન્મુક્તઃ સ વિજ્ઞેયઃ સ ધન્યઃ કૃતકૃત્યવાન્ ।
જીવન્મુક્તપદં ત્યક્ત્વા સ્વદેહે કાલસાત્કૃતે ।
વિશત્યદેહમુક્તત્વં પવનોઽસ્પન્દતામિવ ॥ ૩॥

અશબ્દમસ્પર્શમરૂપમવ્યયં
    તથા રસં નિત્યમગન્ધવચ્ચ યત્ ।
અનાદ્યનન્તં મહતઃ પરં ધ્રુવં
    તદેવ શિષ્યત્યમલં નિરામયમ્ ॥ ૪॥ ઇતિ ॥ ઇતિ
તૃતીયોઽધ્યાયઃ ॥ ૩॥

અથ હૈનં પૈઙ્ગલઃ પપ્રચ્છ યાજ્ઞવલ્ક્યં જ્ઞાનિનઃ કિં
કર્મ કા ચ સ્થિતિરિતિ । સ હોવાચ યાજ્ઞવલ્ક્યઃ ।
અમાનિત્વાદિસમ્પન્નો મુમુક્ષુરેકવિંશતિકુલં તારયતિ ।
બ્રહ્મવિન્માત્રેણ કુલમેકોત્તરશતં તારયતિ ।
આત્માનં રથિનં વિદ્ધિ શરીરં રથમેવ ચ । બુદ્ધિં તુ
સારથિં વિદ્ધિ મનઃ પ્રગ્રહમેવ ચ ॥ ૧॥

ઇન્દ્રિયાણિ હયાનાહુર્વિષયાંસ્તેષુ ગોચરાન્ । જઙ્ગમાનિ
વિમાનાનિ હૃદયાનિ મનીષિણઃ ॥ ૨॥

આત્મેન્દ્રિયમનોયુક્તં ભોક્તેત્યાહુર્મહર્ષયઃ । તતો નારાયણઃ
સાક્ષાદ્ધૃદયે સુપ્રતિષ્ઠિતઃ ॥ ૩॥

પ્રારબ્ધકર્મપર્યન્તમહિનિર્મોકવદ્વ્યવહરતિ ।
ચન્દ્રવચ્ચરતે દેહી સ મુક્તશ્ચાનિકેતનઃ ॥ ૪॥

તીર્થે શ્વપચગૃહે વા તનું વિહાય યાતિ કૈવલ્યમ્ ।
પ્રાણાનવકીર્ય યાતિ કૈવલ્યમ્ ॥

તં પશ્ચાદ્દિગ્બલિં કુર્યાદથવા ખનનં ચરેત્ । પુંસઃ
પ્રવ્રજનં પ્રોક્તં નેતરાય કદાચન ॥ ૫॥

નાશૌચં નાગ્નિકાર્યં ચ ન પિણ્ડં નોદકક્રિયા । ન
કુર્યાત્પાર્વણાદીનિ બ્રહ્મભૂતાય ભિક્ષવે ॥ ૬॥

દગ્ધસ્ય દહનં નાસ્તિ પક્વસ્ય પચનં યથા ।
જ્ઞાનાગ્નિદગ્ધદેહસ્ય ન ચ શ્રાદ્ધં ન ચ ક્રિયા ॥ ૭॥

યાવચ્ચોપાધિપર્યન્તં તાવચ્છુશ્રૂષયેદ્ગુરુમ્ ।
ગુરુવદ્ગુરુભાર્યાયાં તત્પુત્રેષુ ચ વર્તનમ્ ॥ ૮॥

શુદ્ધમાનસઃ શુદ્ધચિદ્રૂપઃ સહિષ્ણુઃ સોઽહમસ્મિ સહિષ્ણુઃ
સોઽહમસ્મીતિ પ્રાપ્તે જ્ઞાનેન વિજ્ઞાને જ્ઞેયે પરમાત્મનિ હૃદિ
સંસ્થિતે દેહે લબ્ધશાન્તિપદં ગતે તદા
પ્રભામનોબુદ્ધિશૂન્યં ભવતિ । અમૃતેન તૃપ્તસ્ય પયસા કિં
પ્રયોજનમ્ । એવં સ્વાત્માનં જ્ઞાત્વા વેદૈઃ પ્રયોજનં કિં
ભવતિ । જ્ઞાનામૃતતૃપ્તયોગિનો ન કિઞ્ચિત્કર્તવ્યમસ્તિ
તદસ્તિ ચેન્ન સ તત્ત્વવિદ્ભવતિ । દૂરસ્થોઽપિ ન દૂરસ્થઃ
પિણ્ડવર્જિતઃ પિણ્ડસ્થોઽપિ પ્રત્યગાત્મા સર્વવ્યાપી ભવતિ ।
હૃદયં નિર્મલં કૃત્વા ચિન્તયિત્વાપ્યનામયમ્ । અહમેવ
પરં સર્વમિતિ પશ્યેત્પરં સુખમ્ ॥ ૯॥

યથા જલે જલં ક્ષિપ્તં ક્ષીરે ક્ષીરં ઘૃતે ઘૃતમ્ ।
અવિશેષો ભવેત્તદ્વજ્જિવાત્મપરમાત્મનોઃ ॥ ૧૦॥

દેહે જ્ઞાનેન દીપિતે બુદ્ધિરખણ્ડાકારરૂપા યદા ભવતિ
તદા વિદ્વાન્બ્રહ્મજ્ઞાનાગ્નિના કર્મબન્ધં નિર્દહેત્ । તતઃ
પવિત્રં પરમેશ્વરાખ્યમદ્વૈતરૂપં વિમલામ્બરાભમ્ ।
યથોદકે તોયમનુપ્રવિષ્ટં તથાત્મરૂપો નિરુપાધિસંસ્થિતઃ
॥ ૧૧॥

આકાશવત્સૂક્ષ્મશરીર આત્મા ન દૃશ્યતે વાયુવદન્તરાત્મા ।
સ બાહ્યમભ્યન્તરનિશ્ચલાત્મા જ્ઞાનોલ્કયાપશ્યતિ
ચાન્તરાત્મા ॥ ૧૨॥

યત્રયત્ર મૃતો જ્ઞાની યેન વા કેન મૃત્યુના । યથા
સર્વગતં વ્યોમ તત્રતત્ર લયં ગતઃ ॥ ૧૩॥

ઘટાકાશમિવાત્માનં વિલયં વેત્તિ તત્ત્વતઃ । સ ગચ્છતિ
નિરાલમ્બં જ્ઞાનાલોકં સમન્તતઃ ॥ ૧૪॥

તપેદ્વર્ષસહસ્રાણિ એકપાદસ્થિતો નરઃ । એતસ્ય ધ્યાનયોગસ્ય
કલાં નાર્હતિ ષોડશીમ્ ॥ ૧૫॥

ઇદં જ્ઞાનમિદં જ્ઞેયં તત્સર્વં જ્ઞાતુમિચ્છતિ । । અપિ
વર્ષસહસ્રાયુઃ શાસ્ત્રાન્તં નાધિગચ્છતિ ॥ ૧૬॥

વિજ્ઞેયોઽક્ષરતન્માત્રો જીવિતં વાપિ ચઞ્ચલમ્ । વિહાય
શાસ્ત્રજાલાનિ યત્સત્યં તદુપાસતામ્ ॥ ૧૭॥

અનન્તકર્મશૌચં ચ જપો યજ્ઞાસ્તથૈવ ચ ।
તીર્થયાત્રાભિગમનં યાવત્તત્ત્વં ન વિન્દતિ ॥ ૧૮॥

અહં બ્રહ્મેતિ નિયતં મોક્ષહેતુર્મહાત્મનામ્ । દ્વે પદે
બન્ધમોક્ષાય ન મમેતિ મમેતિ ચ ॥ ૧૯॥

મમેતિ બધ્યતે જન્તુર્નિર્મમેતિ વિમુચ્યતે । મનસો હ્યુન્મની ભાવે
દ્વૈતં નૈવોપલભ્યતે ॥ ૨૦॥

યદા યાત્યુન્મનીભાવસ્તદા તત્પરમં પદમ્ । યત્રયત્ર મનો
યાતિ તત્રતત્ર પરં પદમ્ ॥ ૨૧॥

તત્રતત્ર પરં બ્રહ્મ સર્વત્ર સમવસ્થિતમ્ ।
હન્યાન્મુષ્ટિભિરાકાશં ક્ષુધાર્તઃ ખણ્ડયેત્તુષમ્ ॥ ૨૨॥

નાહં બ્રહ્મેતિ જાનાતિ તસ્ય મુક્તિર્ન જાયતે । ય
એતદુપનિષદં નિત્યમધીતે સોઽગ્નિપૂતો ભવતિ । સ વાયુપૂતો
ભવતિ । સ આદિત્યપૂતો ભવતિ । સ બ્રહ્મપૂતો ભવતિ । સ
વિષ્ણુપૂતો ભવતિ । સ રુદ્રપૂતો ભવતિ । સ સર્વેષુ
તીર્થેષુ સ્નાતો ભવતિ । સ સર્વેષુ વેદેષ્વધીતો ભવતિ ।

સ સર્વવેદવ્રતચર્યાસુ ચરિતો ભવતિ । તેનેતિહાસપુરાણાનાં
રુદ્રાણાં શતસહસ્રાણિ જપ્તાનિ ફલાનિ ભવન્તિ ।
પ્રણવાનામયુતં જપ્તં ભવતિ । દશ
પૂર્વાન્દશોત્તરાન્પુનાતિ । સ પઙ્ક્તિપાવનો ભવતિ । સ
મહાન્ભવતિ ।
બ્રહ્મહત્યાસુરાપાનસ્વર્ણસ્તેયગુરુતલ્પગમનતત્સંયોગિપાતકેભ્ય
ઃ પૂતો ભવતિ । તદ્વિષ્ણોઃ પરમં પદં સદા પશ્યન્તિ સૂરયઃ
। દિવીવ ચક્ષુરાતતમ્ ॥ તદ્વિપ્રાસો વિપન્યવો જાગૃવાંસઃ
સમિન્ધતે । વિષ્ણોર્યત્પરમં પદમ્ ॥ ૐ સત્યમિત્યુપનિષત્
॥

ૐ પૂર્ણમદ ઇતિ શાન્તિઃ ॥

ઇતિ પૈઙ્ગલોપનિષત્સમાપ્તા ॥

Encoded by Sunder Hattangadi (sunderh@hotmail.com)

---

*pai NgalopaniShath*

pdf was typeset on July 31, 2020

Please send corrections to *sanskrit@cheerful.com*